**JAIN COLLEGE**
463/465, 18th Main Road, SS Royal, 80 Feet Road, Rajarajeshwari Nagar,
Bangalore - 560 098

*Date:* 06/10/2016 | *SUBJECT: SANSKRIT*

*I PUC*
*Midterm Examination*

*Timings Allowed: 3 Hrs.* | *Total Marks: 100*

I. एकवाक्येन संस्कृतभाषया उत्तरं लिखत । 10×1=10.

1. द्वे विद्ये के ?
2. वासवः केषां राजा ?
3. शश-कपिञ्जलयोः विवादनिर्णायकः कः ?
4. मकरालयः कः ?
5. मारीचः कस्य शापात् कौणपताम् अवाप ?
6. उदाहरणवस्तुषु अग्रण्यः कः ?
7. पथिकस्य नामधेयं किं ?
8. रामः कान् स्वजनवत् पश्यति ?
9. शरासनमित्रः कः ?
10. भीमसेनः कं स्वश्याला इति वदति ?

II. द्वित्रैः वाक्यैः संस्कृतभाषया - कन्नडभाषया - आङ्ग्लभाषया वा उत्तरं लिखत । [पञ्चानामेव] 5×2=10.

11. ब्रह्मणः स्वरूपं वर्णयत ।
12. वायसः सोद्वेगं किम् अचिन्तयत् ?
13. भीमसेनः हनूमतः विषये किं वदति ?
14. पुत्र्याः विवाहविषये पर्वतराजस्य निर्णयः कः ?
15. विश्वस्य उत्पत्तिः कथमिति सोदाहरणं लिखत ।
16. भीमसेनः किमर्थं हनूमतः क्षमां याचति ?
17. मुनयः किमर्थं हिमवतः समीपम् आगताः ?

III. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत । [त्रयाणाम् एव] 3x3=09.

18. धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥

19. अहं केसरिणः क्षेत्रे वायुना जगदायुषा ।
जातः कमलपत्राक्ष हनूमन्नाम वानरः ॥

20. इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालङ्कृता सुताम् ॥

21. प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ॥

22. यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥

IV. पाठनाम उल्लिख्य कः कं प्रति अवदत् ? इति - संस्कृतभाषया लिखत । 4x2=08.
[चतुर्णामेव]

23. यद्भूतयोनिं परिपश्यन्ति धीराः ।

24. यो हीनवादी स ते भक्ष्यः ।

25. निर्यातु रामः सह लक्ष्मणेन ।

26. मम नाम कथम् जानासि ।

27. मारीचनीचं जनयाम्बभूव ।

28. मया द्रष्टव्योऽयं न्यायः ।

V. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लघुटिप्पणीः लिखत । [चतुर्णामेव] 4x5=20.

29. श्रीरामस्य गुणान् सङ्गृह्य लिखत ।

30. मार्जारः शशकपिञ्जलौ कथं व्यापादयति ?

31. हनुमता कृता भीमसत्त्वपरीक्षा ।

32. विश्वामित्रस्य विज्ञापनं तथा दशरथस्य निर्णयम् ।

33. अङ्गिरसः हिमवन्तं किम् अवोचत ?

34. ज्यौतिषिक - गुरुनायकयोः संवादः ।

VI. 35. एतासां कृतीनां कवीनां नाम सूचयत । [संस्कृतभाषया] 1x5=05

1. नैषधीयचरितम्
2. उत्तररामचरितम्
3. ऋतुसंहार
4. शिशुपालवधम्
5. किरातार्जुनीयम्

36. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लघु टिप्पणीं रचयत । [एकस्य] 5x1=05

पञ्चमहाकाव्यानि <u>अथवा</u> सुभाषितानि

VII. 37. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत । 3x1=03

1. तत्र सत्रं परित्रातुं ------ महामुनिः ।
2. लीला ------ गणयामास पार्वती ।
3. प्रसीद कपिशार्दूल ------ क्षम्यतां मम ।

[कमलपत्राणि, विश्वामित्रो, दुरुक्तं]

VIII. 38. संयोजयत 1x4=04

| अ | ब |
|---|---|
| • विश्वामित्रः | महर्षिः |
| • अगस्त्यः | गाधिनन्दनः |
| • अङ्गिरसः | कुम्भसम्भवः |
| • अथर्वा | ज्येष्ठपुत्रः |

IX. 39. द्वयोः प्रश्ननिर्माणं कुरुत [रेखाङ्कितानि पदानि आश्रित्य]

1×2=02.

1. मुनिः अस्त्राणि ताटकामाथिने ददौ ।
2. मार्गे विविधाः आपणाः आसन् ।
3. भीमः पुच्छं चालयितुं न शशाक ।

X. एतेषां उपप्रश्नानाम उत्तराणि संस्कृतभाषया लिखत । [षण्णामेव]

6×2=12.

40. सन्धिं विभजत [द्वयोः] ।

बलोन्मत्तम , तवैव, कृष्णश्च

41. सन्धिं योजयत [द्वयोः] ।

चलति + एव, येन + अत्र, महा + उरगः

42. रिक्तस्थाने सूक्तं विभक्तिरूपं लिखत [द्वयोः] ।

तस्मात् ___ तेभ्यः

___ गिरी गिरयः

सभायाम सभयोः ___

43. रिक्तस्थाने सूक्तं क्रियापदरूपं लिखत । [द्वयोः]

तुष्यति ___ तुष्यन्ति

साधयेयम साधयेव ___

___ निवर्तेते निवर्तन्ते

44. पदपरिचयं कुरुत । [द्वयोः]

विजित्य, ज्ञात्वा, वारयितुं

45. समानार्थकपदं लिखत ।

उदकम , नयनम

46. विरुद्धार्थकपदं लिखत ।

उत्साहः , सन्मार्गः

I. 47. संस्कृतभाषया अनुवदत । 1×4=04

1) ರಾಜನು ಕವಿಗಳನ್ನು ಸನ್ಮಾನಿಸುತ್ತಾನೆ.
The king honours the poets.
2) ಮರದಿಂದ ಹಣ್ಣು ಕೆಳಗೆ ಬೀಳುತ್ತದೆ.
A fruit falls from the tree.
3) ವನ್ಯ ಮೃಗಗಳು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ.
The wild animals live in the forest.
4) ಮಕ್ಕಳು ಉದ್ಯಾನವನದಲ್ಲಿ ಆಟವಾಡುತ್ತಾರೆ.
The children play in the garden.

48. कन्नडभाषया आङ्ग्लभाषया वा अनुवदत । 1×4=04

1) पुरा जनकः नाम राजा आसीत् ।
2) वयं सर्वदा सत्यं वदाम ।
3) दुन्दुभेः शब्दः गम्भीरः भवति ।
4) भारतदेशस्य संस्कृतिः सनातना वर्तते ।

XII. 51. परिच्छेदमिमं पठित्वा प्रश्नानाम उत्तराणि लिखत - [संस्कृतभाषया] 4.

बृहत्कथा नाम एकः कथासंग्रहः । अस्य मूलभाषा पैशाची नाम विभाषा इति प्रतीतिः । अस्य कथासंग्रहस्य कर्ता गुणाढ्यः । बृहत्कथा मूलरूपेण न लभ्यते । किन्तु अस्य भाषारूपान्तराणि प्रसिद्धानि वर्तन्ते । संस्कृतभाषायां त्रीणि रूपान्तराणि उपलभ्यन्ते । तानि सोमदेवस्य कथासरित्सागरः, क्षेमेन्द्रस्य बृहत्कथामञ्जरी, बुधस्वामिनः बृहत्कथाश्लोकसंग्रहः इति । कन्नडभाषायां 'वड्डाराधने' इति रूपान्तराकृतिः प्रसिद्धा । उदयन महाराजस्य जीवनवृत्तान्तः बृहत्कथायां निरूपिताः सन्ति ।

प्रश्नाः

1. बृहत्कथा नाम किम् ?
2. पैशाची नाम का इति प्रतीतिः ?
3. बृहत्कथायाः कन्नड रूपान्तरस्य नाम किम् ?
4. बृहत्कथायां कस्य महाराजस्य वृत्तान्तः निरूपितः ?

—o—